# Shri Lakshmistotram

# શ્રીલક્ષ્મીસ્તોત્રમ્

## Document Information

Text title : lakShmIstotram

File name : lakShmIstotram.itx

Category : devii, lakShmI, devI

Location : doc_devii

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : Edited by S. V. Radhakrishna Shastriji

Acknowledge-Permission: Mahaperiaval Trust

Latest update : May 13, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# શ્રીલક્ષ્મીસ્તોત્રમ્

દેવકૃતમ્ ।

ક્ષમસ્વ ભગવત્યમ્બ ક્ષમાશીલે પરાત્પરે ।
શુદ્ધસત્ત્વસ્વરૂપે ચ કોપાદિપરિવર્જિતે ॥ ૧॥

ઉપમે સર્વસાધ્વીનાં દેવીનાં દેવપૂજિતે ।
ત્વયા વિના જગત્સર્વં મૃતતુલ્યં ચ નિષ્ફલમ્ ॥ ૨॥

સર્વસમ્પત્સ્વરૂપા ત્વં સર્વેષાં સર્વરૂપિણિ ।
રાસેશ્વર્યધિદેવી ત્વં ત્વત્કલાઃ સર્વયોષિતઃ ॥ ૩॥

કૈલાસે પાર્વતી ત્વં ચ ક્ષીરોદે સિન્ધુકન્યકા ।
સ્વર્ગે ચ સ્વર્ગલક્ષ્મીસ્ત્વં મર્ત્યલક્ષ્મીશ્ચ ભૂતલે ॥ ૪॥

વૈકુણ્ઠે ચ મહાલક્ષ્મીર્દેવદેવી સરસ્વતી ।
ગઙ્ગા ચ તુલસી ત્વં ચ સાવિત્રી બ્રહ્મલોકતઃ ॥ ૫॥

કૃષ્ણપ્રાણાધિદેવી ત્વં ગોલોકે રાધિકા સ્વયમ્ ।
રાસે રાસેશ્વરી ત્વં ચ વૃન્દાવનવને વને ॥ ૬॥

કૃષ્ણપ્રિયા ત્વં ભાણ્ડીરે ચન્દ્રા ચન્દનકાનને ।
વિરજા ચમ્પકવને શતશૃઙ્ગે ચ સુન્દરી ॥ ૭॥

પદ્માવતી પદ્મવને માલતી માલતીવને ।
કુન્દદન્તી કુન્દવને સુશીલા કેતકીવને ॥ ૮॥

કદમ્બમાલા ત્વં દેવિ કદમ્બકાનનેઽપિ ચ ।
રાજલક્ષ્મી રાજગૃહે ગૃહલક્ષ્મીર્ગૃહે ગૃહે ॥ ૯॥

ઇત્યુક્ત્વા દેવતાઃ સર્વા મુનયો મનવસ્તથા ।
રુરુદુર્નમ્રવદનાઃ શુષ્કકણ્ઠોષ્ઠતાલુકાઃ ॥ ૧૦॥

ઇતિ લક્ષ્મીસ્તવં પુણ્યં સર્વદેવૈઃ કૃતં શુભમ્ ।

યઃ પઠેત્પ્રાતરુત્થાય સ વૈ સર્વં લભેદ્ધ્રુવમ્ ॥ ૧૧॥

અભાર્યો લભતે ભાર્યાં વિનીતાં સુસુતાં સતીમ્ ।
સુશીલાં સુન્દરીં રમ્યામતિસુપ્રિયવાદિનીમ્ ॥ ૧૨॥

પુત્રપૌત્રવતીં શુદ્ધાં કુલજાં કોમલાં વરામ્ ।
અપુત્રો લભતે પુત્રં વૈષ્ણવં ચિરજીવિનમ્ ॥ ૧૩॥

પરમૈશ્વર્યયુક્તં ચ વિદ્યાવન્તં યશસ્વિનમ્ ।
ભ્રષ્ટરાજ્યો લભેદ્રાજ્યં ભ્રષ્ટશ્રીર્લભતે શ્રિયમ્ ॥ ૧૪॥

હતબન્ધુર્લભેદ્બન્ધું ધનભ્રષ્ટો ધનં લભેત્ ।
કીર્તિહીનો લભેત્કીર્તિં પ્રતિષ્ઠાં ચ લભેદ્ધ્રુવમ્ ॥ ૧૫॥

સર્વમઙ્ગલદં સ્તોત્રં શોકસન્તાપનાશનમ્ ।
હર્ષાનન્દકરં શશ્વદ્ધર્મમોક્ષસુહૃત્પ્રદમ્ ॥ ૧૬॥

ઇતિ દેવકૃતં શ્રીલક્ષ્મીસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

*Shri Lakshmistotram*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*